अहेरिव गणाद्भीतः सौहित्यान्नरकादिव ।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥
येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः ॥
विमुक्तं सर्व्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम् ।
अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः ॥
जीवितं यस्य धर्म्मार्थं धर्म्मो रत्यर्थमेव च ।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्म्माणं तं देवा ब्राह्मणं विदुः ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥

अपि च । विशाखयूप उवाच ।
"विप्रस्य लक्षणं ब्रूहि त्वद्भक्तिः का च तत्कृता ।
यतस्त्वयानुग्रहेण वाग्वाणाः ब्राह्मणाः कृताः ॥
कल्किरुवाच ।
वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत् परम् ।
ते वेदा ब्राह्मणमुखे नाना धर्म्माः प्रकाशिताः ॥
यो धर्म्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला ।
तयाहं तोषितः श्रीशः संभवामि युगे युगे ॥
ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्व्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥
मृद्भस्मचन्दनाद्यैस्तु धारयेत्तिलकं द्विजः ।
भाले त्रिपुण्ड्रं कर्म्माङ्गं केशपर्य्यन्तमुज्ज्वलम् ॥
पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधाकृतम् ।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम् ॥
ब्राह्मणानां करे स्वर्गा वाचो वेदाः करे हरिः ।
गात्रे तीर्थानि यागाश्च नाडीषु प्रकृतिस्त्रिवृत् ॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसङ्गतम् ।
तेषां स्तनान्तरे धर्म्मः पृष्ठेऽधर्म्मः प्रकीर्त्तितः ॥
भूदेवा ब्राह्मणा राजन् ! पूज्या वन्द्याः सदु-
क्तिभिः ।
चातुराश्रम्यकुशला मम धर्म्मप्रवर्त्तकाः ॥
बालाश्चापि ज्ञानवृद्धास्तपोवृद्धा मम प्रियाः ।
तेषां वचः पालयितुमवताराः कृता मया ॥
महाभाग्यं ब्राह्मणानां सर्व्वपापप्रणाशनम् ।
कलिदोषहरं श्रुत्वा मुच्यते सर्व्वतो भयात् ॥"
इति कल्किपुराणे ४ अध्यायः ॥ * ॥

अपि च ।
"कर्म्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम् ।
स्वधर्म्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३५ अध्यायः ॥ * ॥

अपि च ।
"जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथोऽद्रोह आनृशंस्यं त्रपा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥ * ॥

तस्य धर्म्मो यथा,—
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज ! धर्म्ममाहुः पुरातनम् ॥
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ।
तञ्चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि ॥
अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् ।
कुर्व्वीतोपेत्य सन्तानमथ दद्याद्यजेत च ॥
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ॥
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ।"
इति पाद्मे स्वर्गखण्डे २६ अध्यायः ॥ * ॥

तस्य माहात्म्यादि यथा,—
"सर्व्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः ।
तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः ॥
सर्व्वदेवाग्रजो विप्रः प्रत्यक्षत्रिदशो भुवि ।
स तारयति दातारं दुस्तरे विश्वसागरे ॥
हरिशर्म्मोवाच ।
सर्व्ववर्णगुरुर्व्विप्रस्त्वया प्रोक्तः सुरोत्तम ! ।
तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते ॥
ब्रह्मोवाच ।
सर्व्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि ।
अविद्या वा सविद्या वा नात्र कार्य्या विचारणा ॥
स्तेयादिदोषलिप्ता ये ब्राह्मणा ब्राह्मणोत्तम ! ।
आत्मभ्यो द्वेषिणस्तेऽपि परेभ्यो न कदाचन ॥
अनाचारा द्विजाः पूज्या न च शूद्रा जिते-
न्द्रियाः ।
अभक्ष्यभक्षका गावः कोलाः सुमतयो न च ॥
माहात्म्यं भूमिदेवानां विशेषादुच्यते मया ।
तव स्नेहाद्द्विजश्रेष्ठ ! निशामय समाहितः ॥
क्षत्त्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः ।
अन्योन्यं गुरवो ज्ञेयाः पूजनीयाश्च भूसुर ! ॥
ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तमः ।
आयुः पुत्राश्च कीर्त्तिश्च सम्पत्तिस्तस्य वर्द्धते ॥
न च नौति द्विजं यस्तु मूढधीर्मानवो भुवि ।
सुदर्शनेन तच्छीर्षं हन्तुमिच्छति केशवः ॥"
पुष्पादिहस्तब्राह्मणस्य प्रणामनिषेधो यथा,—
"पुष्पहस्तं पयोहस्तं देवहस्तञ्च भूसुर ! ।
न नमेद्ब्राह्मणं प्राज्ञस्तैलाभ्यङ्गितविग्रहम् ॥
जलस्थं देववेश्मस्थं ध्यानमग्नितचेतसम् ।
देवपूजाञ्च कुर्व्वन्तं न नमेद्ब्राह्मणं बुधः ॥
वह्निक्रियां प्रकुर्व्वन्तं भुञ्जानञ्च द्विजोत्तम ! ।
तथा सामानि गायन्तं न नमेद्ब्राह्मणं बुधः ॥
ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम ! ।
प्रत्येकन्तु नमस्कारस्तत्र कार्य्यो न धीमता ॥
कृताभिवादनं विप्रं भक्त्या यो नाभिवादयेत् ।
स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च ॥
कृतप्रणामं तनयं नमेतां पितरौ न च ।
कृतप्रणामाः सर्व्वेऽपि नमस्कार्य्या द्विजैर्द्विजाः ॥
कृतदोषान् द्विजान् गाश्च न द्विषन्ति विच-
क्षणाः ।
द्विषन्ति वापि मोहेन तेषां रुष्टः सदा हरिः ॥
याचकान् ब्राह्मणान् यस्तु कोपदृष्ट्या प्रपश्यति ।
सूचीप्रक्षेपणं तस्य नेत्रयोः कुरुते यमः ॥
विप्रनिर्भर्त्सनं मूढा येन वक्त्रेण कुर्व्वते ।
तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै ॥
ब्राह्मणो यद्गृहे भुङ्क्ते तद्गृहे केशवः स्वयम् ।
देवताः सकला एव पितरश्च सुरर्षयः ॥"
तस्य पादोदकादिमाहात्म्म् यथा,—
विप्रपादोदकं यस्तु कणमात्रं वहेद्बुधः ।
देहस्थं पातकं तस्य सर्व्वमेवाशु नश्यति ॥
कोटिब्रह्माण्डमध्येषु सन्ति तीर्थानि यानि वै ।
तीर्थानि तानि सर्व्वाणि वसन्ति द्विजपादयोः ॥
विप्रपादोदकैर्नित्यं सिक्तं स्याद्यस्य मस्तकम् ।
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ॥
सर्व्वपापानि घोराणि ब्रह्महत्यादिकानि च ।
सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात् ॥
क्षयाद्या व्याधयः सर्व्वे परमक्लेशदायकाः ।
गच्छन्ति विलयं सद्यो विप्रपादाम्बुभक्षणात् ॥
पित्रर्थं यानि तोयानि दीयन्ते विप्रपादयोः ।
तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम् ॥
प्रक्षाल्य विप्रचरणौ दूर्व्वाभिर्योऽर्च्चयेद्बुधः ।
तेनार्च्चितो जगत्स्वामी विष्णुः सर्व्वसुरोत्तमः ॥
विप्राणां पादनिर्म्माल्यं यो मर्त्यः शिरसा वहेत् ।
सत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि शाश्वती ॥
तस्य प्रदक्षिणफलम् ।
"विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥"
तस्य पादसेचनफलम् ।
यो दद्यात् फलताम्बूलं विप्राणां पादसेचने ।
इह लोके सुखं तस्य परलोके ततोऽधिकम् ॥
पुत्त्रार्थी लभते पुत्त्रं धनार्थी लभते धनम् ।
मोक्षार्थी लभते मोक्षं विप्रपादस्य सेचनात् ॥
रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात् ।
मुच्येत बन्धनाद्बद्धो विप्राणां पादसेचनात् ॥
अनपत्याश्च या नार्य्यो मृतापत्याश्च याः स्त्रियः ।
बह्वपत्या जीववत्साः स्युर्व्विप्रपादसेचनात् ॥"
इति पाद्मे क्रियायोगसारे २० अध्यायः ॥

तस्य सन्ध्याया अकरणे दोषो यथा,—
"नोपतिष्ठति यः पूर्व्वां नोपास्ते यस्तु पश्चिमाम् ।
स शूद्रवद्बहिः कार्य्यः सर्व्वस्माद्द्विजकर्म्मणः ॥"
तस्य सन्ध्याकरणफलं यथा,—
"यावज्जीवनपर्य्यन्तं यस्त्रिसन्ध्यं करोति च ।
स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा ॥
तत्पादपद्मरजसा सद्यः पूता वसुन्धरा ।
जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः ॥
तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः ।
ततः पापानि यान्त्येव वैनतेयादिवोरगाः ॥
सन्ध्याया अकरणे दोषो यथा,—
"न गृह्णन्ति सुरास्तेषां पितरः पिण्डतर्पणम् ।
स्वेच्छया च द्विजातेश्च त्रिसन्ध्यरहितस्य च ॥"
तस्य निन्दितकर्म्माणि यथा,—
"विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः ।
एकादशीविहीनश्च विषहीनो यथोरगः ॥
हरेर्नैवेद्यभोजी न धावको वृषवाहकः ।